# Shri Vijnananandanavakam

# श्रीविज्ञानानन्दनवकम्

## Document Information

Text title : Shri Vijnananandanavakam

File name : vijnAnAnandanavakam.itx

Category : deities_misc, gurudev, rAmakRiShNa, nava

Location : doc_deities_misc

Author : Panchugopala Bandyopadhyaya

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

Shri Vijnananandanavakam

# श्रीविज्ञानानन्दनवकम्

प्रणमामि महाप्राज्ञं विज्ञानानन्द-नामकम् ।
ज्ञान-विज्ञान-निष्णातं श्रीरामकृष्ण-पार्षदम् ॥ १॥

प्रणमामि महावीरं विज्ञानानन्द-नामकम् ।
स्वनाथ रामकृष्णेन मल्ल-क्रीड़ा-रतं भृशम् ॥ २॥

प्रणमामि महासत्वं विज्ञानानन्द-नामकम् ।
सर्वैषणा-विनिर्मुक्तं सत्यार्जवादि-भूषितम् ॥ ३॥

प्रणमामि तपोयुक्तं विज्ञानानन्द-नामकम् ।
स्त्रीभ्योऽतिसावधानं च प्रयाग-पुर-वासिनम् ॥ ४॥

प्रणमामि सु-तत्त्वज्ञं विज्ञानानन्द-नामकम् ।
पूर्त-शिल्प-कला-दक्षं मन्दिरादि-प्रकल्पकम् ॥ ५॥

प्रणमामि मठाध्यक्षं विज्ञानानन्द-नामकम् ।
सङ्घगुरुं कृपा-मूर्तिं संसारार्णव-तारकम् ॥ ६॥

प्रणमामि गुणातीतं विज्ञानानन्द-नामकम् ।
माया-मोह-विजेतारं परमहंस-लक्षणम् ॥ ७॥

प्रणमामि त्रयी-मूर्तिं विज्ञानानन्द-नामकम् ।
मोक्षदं च दयाधारं दिव्य-लीला-प्रकाशकम् ॥ ८॥

अन्वर्थ-नामाऽसौ यस्मिन् सदा श्रीहरिः प्रसन्नः
श्रीरामकृष्णो वै साक्षात् इह श्रीहरिर्नृमूर्तिः ।
तस्य प्रसादात् यो नूनं परानन्द युक्त प्रबोधे
तस्माच्च हेतोः सोऽभूत् विश्रुतौ युक्त-पूत-नाम्ना ॥ ९॥

इति प्राध्यापकपाञ्चुगोपालवन्द्योपाध्यायेनविरचितं
“श्रीमद्विज्ञानानन्द- नवकम्” सम्पूर्णम् ।

प्रणाममन्त्रः -
“आजन्म ज्ञान-विज्ञान निष्णाताय महात्मने ।
विज्ञानानन्दपादाय भूयो भूयो नमोऽस्तुते”॥

Proofread by Aruna Narayanan

*Shri Vijnananandanavakam*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*